# Budhakritam Shiva Stotram

# बुधकृतं शिवस्तोत्रम्

## Document Information

Text title : Budhakritam Shiva Stotram

File name : budhakRRitaMshivastotram.itx

Category : shiva, skandapurANa, stotra, aShTaka

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | kAshIkhaNDa | pUrvakhaNDa | adhyAya 15/55-61||

Latest update : June 9, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 9, 2025

*sanskritdocuments.org*

# बुधकृतं शिवस्तोत्रम्

(जटेश्वर लिङ्ग)

बुध उवाच ।

नमः पूतात्मने तुभ्यं ज्योतीरूप नमोऽस्तु ते ।
विश्वरूप नमस्तुभ्यं रूपातीताय ते नमः ॥ १॥

नमः सर्वार्तिनाशाय प्रणतानां शिवात्मने ।
सर्वज्ञाय नमस्तुभ्यं सर्वकर्त्रे नमोऽस्तु ते ॥ २॥

कृपालवे नमस्तुभ्यं भक्तिगम्याय ते नमः ।
फलदात्रे च तपसां तपोरूपाय ते नमः ॥ ३॥

शम्भो शिव शिवाकान्त शान्त श्रीकण्ठ शूलभृत् ।
शशिशेखरशर्वेश शङ्करेश्वर धूर्जटे ॥ ४॥

पिनाकपाणे गिरिश शितिकण्ठ सदाशिव ।
महादेव नमस्तुभ्यं देवदेव नमोऽस्तु ते ॥ ५॥

स्तुतिकर्तुं न जानामि स्तुतिप्रिय महेश्वर ।
तव पादाम्बुजद्वन्द्वे निर्द्वन्द्वा भक्तिरस्तु मे ॥ ६॥

अयमेव वरो नाथ प्रसन्नोऽसि यदीश्वर ।
नान्यं वरं वृणे त्वत्तः करुणामृतवारिधे ॥ ७॥

ततः प्राह महेशानस्तत्स्तुत्या परितोषितः ।
रौहिणेय महाभाग सौम्य सौम्यवचोनिधे ॥ ८॥

इति श्रीस्कादपुराणे काशीखण्डे पूर्वार्द्धे पञ्चदशा- ध्यायान्तर्गतं
बुधकृतं शिवस्तोत्रं समाप्तम् ।

स्कन्दपुराण । काशीखण्ड । पूर्वखण्ड १ । अध्याय १५/५५-६१ ॥

skandapurANa . kAshIkhaNDa . pUrvakhaNDa 1 . adhyAya 15/55-61..

Proofread by PSA Easwaran

*Budhakritam Shiva Stotram*

pdf was typeset on June 9, 2025

Please send corrections to *sanskrit@cheerful.com*